International Journal of Sanskrit Research 2019; 5(4): 276-280

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 276-280
© 2019 IJSR
www.anantaajournal.com
Received: 16-05-2019
Accepted: 18-06-2019

**Dr. Sasmita Bandar Nayak**
Lecturer in Sarvdarshan Dept., P.G. Teaching Dept., S.J.S.U. University, Shree Vihar, PURI, Odisha, India

**Correspondence**
**Dr. Sasmita Bandar Nayak**
Lecturer in Sarvdarshan Dept., P.G. Teaching Dept., S.J.S.U. University, Shree Vihar, PURI, Odisha, India

# श्रीमद्भगवद्गीतायां योगः

**Dr. Sasmita Bandar Nayak**

## प्रस्तावना

### गीतायां योगशब्दनिर्वचनम्

योगेश्वरस्य भगवतः श्रीकृष्णस्य मुखपद्माद्विनिः सृता। अमृतवर्षिणी श्रीमद्भागवतगीतेयं योगशब्दस्य निर्वचने शास्त्रान्तरेभ्यः किमपि वैलक्षण्यमादधाति। अभिरुचिविभेदात् यद्यपि योगस्य अनेके अर्थाः योगशास्त्रप्रणेतृभिः विविच्यन्ते, तथापि योगशब्दस्य निर्वचने ते ते अर्थाः गीतायामन्तर्भवन्ति। कदाचिद् योगस्य तत्साधानस्य च दुरुहां प्रक्रियामतिरिच्य भगवता सरसतया निगूढः योगशब्दः सरलीक्रियते। तत्र प्रसङ्गे –

1. समत्वं योग उच्यते [1] इति योगस्य समत्वे एव प्रतिष्ठा विहिता।
2. योगः कर्मसु कौशलम् [2] इति उक्त्वा कर्मसु नाम सकामनिष्कामेषु मध्ये उदासीनत्वेन कर्मकरणम् एव आदिशता निष्कामकर्मयोगः संस्थाप्यते।
3. "यंसन्न्यासमिति प्राहुः योगं तं विद्धि पाण्डव" [3] इत्यादिषु सन्न्यासयोगस्व अवतरणं विधीयते। अत्र विषयेभ्यश्चित्तनैश्चल्यमेव योगशब्दार्थः इति निरुपयति।
4. "यत्रोपरमते चित्तं निरुद्धं योगसेवया" [4] इत्यादिषु समाधियोगस्य निर्देशो भगवता कृतः। आत्मना परमात्माकारान्तःकरणे आत्मानं परमात्मानं पश्यन् तस्मिन् तुष्यति इत्यर्थः।
5. "तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन" [5] इत्यादौ ज्ञानयोगस्य महिमा प्रदर्शितः।
6. "माचं योऽव्यभिचारेण भक्तियोगेन सेवते" [6] इत्यादिषु कर्मज्ञानाद्यमिश्रः अनन्यः भक्तियोग: प्रदर्शितः।
7. "ददामि बुद्धियोगं तं ये न मामुपयान्ति ते" [7] इत्यादिषु बुद्धियोगस्य अवतारणा कृता विद्यते।
8. अनन्यनैव योगेन मां ध्यायन्त उपासते [8] इत्यादिषु अनन्ययोगः प्रतिपादितः।

एवंप्रकारेषु अनेकेषु स्थलेषु भगवता योगस्य वैचित्र्यं निरुपयता योगस्य किमपि अपूर्व माधुर्य सूपन्यस्यते। योगस्य एष उपन्यासः योगशास्त्रस्य प्राचीनां परम्परामर्वाचीनां परम्परामर्वाचीनां च परम्परां सम्यक् अनुशास्ति इति नास्ति केषाञ्चित् मतवैषम्यम्। एतेन ज्ञायते श्रीमद्भगवद्गीतायां पातञ्जलयोगादन्यः कोऽपि योगः वर्णितः। अपरोक्षानुभवः समाधिः योगः इति गीतायामपि निर्णीतो दृश्यते। कर्मयोगेऽपि ज्ञानयोगस्य अन्तर्भावः, ज्ञानयोगेऽपि कर्मयोगस्य पर्यवसानं, भक्तियोगे कर्मयोगस्य ज्ञानयोगस्य अन्तर्भवनं

परिलक्ष्यते। कर्मयोगे निष्कामकर्मयोगस्य, भक्तियोगे अनन्यभक्तियोगस्य ज्ञानयोगे पूर्णानुभवस्य परिप्रकाशः सुस्पष्टः। कदाचिद् जीवात्मपरमात्मनोः योगः, प्राणापानयोर्योगः, ईडापिङ्गलयोः योगः निपुणतया प्रतिपादयति सर्वेषामपि स्वतन्त्र कञ्चन मार्ग विशेषम प्रतिपादितेषु अपि विविधेषु योगेषु कर्मज्ञानभक्तियोगानां विचारः यथाशास्त्रं चिकिर्ष्यते।

**कर्मयोगः**

श्रीमद्भगवद्गीतायां कर्मयोगस्य प्राकाम्यं ततश्च तस्योपयोगः, तेन संसिद्धिलाभः इत्यादयः विषयाः सौक्ष्म्येन विचारपथं समापयन्ति। कर्मणः संज्ञानिरुपणे, तस्य च अनुष्ठाने शास्त्रान्तरेषु चर्चिता विषयाः दृश्यन्ते, ते खलु साधारणतया कदाचिद् भ्रममुत्पादयन्ति। “किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताःह्ल इत्यादिषु तस्य कर्मणः दुरुहावबोधः सूचितः। शास्त्रान्तरेषु कर्मणः अभ्रान्तसिद्धान्तपर्यालोचने काठिन्यं विचार्य भगवता कर्मणः स्वरूपं, कर्मयोगस्य अनुष्ठानं, कर्मयोगस्यानुष्ठाने के के विषयाः अवधेयाः, कर्मयोगिनः अवस्थितिश्च इत्यादयः प्रमुखाः विचाराः प्रोक्ताः, येषां सुष्ठुज्ञानेन अज्ञानं विनश्यति, आत्मलाभश्च जायते। किम्भूतं कर्माचरणीयमिति विचार्यमाणे गभवतोपदिष्टं यत् –

तस्याच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥[9]

कर्मानुष्ठाननिरुपणं शास्त्रानुसारं कर्तव्यं पुनश्च कर्मस्वरूपनिर्णये शास्त्रमेव प्रमाणम। पूर्वजन्मकर्मानुरुपं जन्म लब्ध्वा कदाचिद् मनुष्यः तत्तत्संस्कारानुकूल्येन कदाचिद् शास्त्रनिन्दितं कर्म कर्तु प्रवर्तते। एतदर्थभगवता “शास्त्रविधानोक्तह्लमित्युक्त्वा समुचिते कर्मणि नियोजयितुं शास्त्रविधानमार्गः समुपदिष्टः। येन कर्मयोगेन मनुष्यः उत्तमां योनिमधिगच्छति, अन्यथा तिर्यग्योनिं सम्प्राप्य चरमं परमं च लक्ष्यं विस्मरति। छान्दोग्योपनिषदि अपि एतद् प्रतिपादितं दृश्यते यथा –

तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणियां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं व चाण्डालयोनिं वा[10]

एतस्मात् ज्ञायते यत् गभवता प्रथमं सोपानं विनिर्मितं कर्मयोगमार्ग-मारुरुक्षवे कनिष्ठाधिकारिणे। भित्तिः सुदृठा चेत् कर्मयोगस्य अन्तिमं लक्ष्यं सुकरं भविष्यतीति अग्रे व्याख्यास्यते। गीतायां प्रतिपादितस्य सरलस्य योगस्य आधारभूतः कर्मयोग इति प्रशस्तिः, प्रत्येकं क्षणं विना कर्मणा न कोऽपि स्थातुं शक्नुयात्। तथोक्तं – “न हि कश्चन क्षणमपि जातु तिष्ठत्यकर्मकृत् इति कर्मण आधारतां व्यञ्जयति। तत् कर्मयोगः केन प्रकारेण, कदा किमर्थ वा अनुष्ठियते, एतदर्थं भगवता महान् विचारः स्वीयया वाग्मितया उपपादितः। वर्णाश्रमपालनं कर्मयोगस्य प्रथमः पन्थाः इति ग्रथितः महोपनिषदि गीतायाम् –

**सहजं कर्म कौन्तेय सदोषमपि न तज्येत्॥**

इत्यादौ दोषयुक्तमपि सहजं कर्म न त्याज्यमिति वर्णाश्रमधर्मपालने कर्मयोगिनमादौ प्रेरयति। कस्यां परिस्थितौ किं कर्म कर्त्तव्यं, किं वा अनाचरणीयमिति विशदतया वर्णितम्। सहजकर्मविधाने तत्र कमपि नियमं वध्नातिअसतः अर्थात् अनासक्तः सन् कर्म कुर्यात्, तेन च कर्मबन्धनं न जायते, यथार्थकर्माचरणं च भवति –

**तस्मादसक्तं सततं कार्य समाचारं।**

आसक्तिशून्यः सन् कर्म समाचरेत् विना कर्मानुष्ठानं शरीरयात्रा न सम्भवति, अतः सर्वदा सर्वथैव निरहंकारेण मनसा अनुष्ठितः कर्मयोगः प्रशस्यते। तत्त्ववित् ‘अहंकृतिः’ इति भावना कदापि न कुरुते- नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्ह्ल इति कर्मयोगिनः कमाःनुष्ठानप्रक्रियां प्रदर्शयति। साहंकारः मनुष्यः कर्त्रिभमानेन विमूढः कर्मयोगं प्रवेष्टुं न शक्नोति। तथा चोक्तं –

**अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते।**

आदौ कर्मयोगी कर्तृत्वाभिमानं परित्यजेत्, अन्यथा तत् कर्म विशुद्धमनिन्दितं च न भवति। एवं सिद्धावसिद्धौ समभावापन्नः धृत्युत्साहसंपत्तिमान् मुक्तः सात्त्विकः निरहङ्कारी अनासक्तः कर्ता कर्मयोगमनुष्ठातुं योग्यः सञ्जायाते।

गीतोपनिषदि कर्मयोगिन: द्वितीयं सोपानं निर्दिशति। प्रथमतः कर्मयोगी स्वीय अभिमानादिकं परित्यजति। द्वितीयतः अभिमानशून्यं कर्मानुष्ठीयमानः कर्मफलमपि त्यजति इति कर्मयोगिन: प्रगतिं निरुपयति। नैष्ठिकी शान्तिमेव योगिनः कामयन्ते। विना कर्मफलत्यागेन न तदधिगमः सम्भवेदिति उपदिशति –

युक्तं कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कमाकारेण फले सक्तो विबध्यते॥[11]

अत एव भगवतोपदिश्यते –

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

फलाभिसन्धिराहितः योगी तावत् कर्मयोगस्य उत्तमां पदविमधिरोहति। उक्तं च –

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥

कर्मयोगस्य अन्तिमं सोपानं भवति निष्कामकर्मानुष्ठानम्। निष्कामकर्मानुष्ठानमनेन कर्मयोगी योगस्यानुत्तमां पदवीं समधिगच्छति। गीतायां सर्वत्र एव निष्कामकर्मयोगस्य उपदेशः प्राप्यते। तृतीयाध्याये निष्कामकर्मयोगस्य श्रेष्ठत्वं प्रतिपादयता भगवता श्रीकृष्णेन उच्यते यत् –

यस्तिवन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगमसक्त: स विशिष्यते॥[12]

मनसा इन्द्रियाणि निगृह्य कर्मेन्द्रियैः कर्मयोगः आचर्यते। स अनासक्तः पुरुषः श्रेष्ठो भवति।
द्वितीयाध्याये कर्मसु कौशल्यमेव योगः, स एव योगः पापपुण्यपरिहारपूर्वकं समनुष्ठातव्यः। यथोक्तं –

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद् योगाय युजस्व योगः कर्मसु कौशलम्॥[13]

निष्कामकर्मयोगी ब्रह्मरूपेण समाधिना ब्रह्माणं प्राप्नोति। तस्य कृते अपर्णम्, अर्पणीयं द्रव्यम्, अर्पणीयाधारोऽग्निः सर्वमेव परंब्रह्मात्मकं भवति। अत उक्तं –

ब्रह्मार्पणं ब्रह्महविर्ब्रहमाग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना॥[14]

गीतोपनिषदि प्रतिपादितः कर्मयोगो निष्कामकर्मानुस्वरूप एव। निष्कामकर्मयोग एव कर्मयोगस्य साध्यम्। निष्कामकर्मयोगी सर्वदा आत्मनि अनुरक्तः, आत्मस्वरुपे अवस्थितः, आत्मस्वरुपे परितृप्तः सन् निःशेषितकर्त्तव्यकरमा अपि लोकक्षिक्षार्थ कार्य कुर्वत् सिद्धिं विन्दति अर्थात् परमार्थ संप्राप्नोति।

कर्मण्येव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥[15]

अत्रेदमवधेयम्-श्रीमद्भागवतगीतायां कर्मफलत्यागस्य श्रेष्ठत्वं प्रतिपादितं न तु कर्मत्यागस्य। कर्मत्यागस्य निषेधः सर्वथा उपदिष्टः। परमां शान्तिं कर्मफलत्यागः समीचीन एव। उक्तं च कर्मसन्न्यासाद् पुरुषः सिद्धिं न प्राप्नोति। यथोक्तं–

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च सन्यसनादेव सिद्धिं समधिगच्छति॥

एवं प्रकारेण सर्वत्र गीतायां निष्कामकर्मयोगस्य, तदनुष्ठानस्य कदाचिद् कर्मफलत्यागस्य प्रकारं भगवता अभ्यधायि। किञ्च निष्कामकर्मानुष्ठानेन योगी स्वीयामभीष्टां पदवीं समधिरोढुं शक्नोति इति कर्मयोस्य विचारः समुपन्यस्तः।

**ज्ञानयोग**

किञ्च ज्ञानाकाङ्क्षिणां जिज्ञासोपशान्तये भगवती गीता ज्ञानयोगमपि विवृणोति। जिवामात्रस्य निवृत्तिरेव ज्ञानस्य परममुद्देश्यम्। ज्ञानेन तुच्छमिन्द्रियग्राह्यं सुखं परित्यज्य अतीन्द्रियं बुद्धिग्राह्यं सुखमनुभवति जीवः। अन्यथा अज्ञानविमोहितः संसारचक्रे भ्रमन् संस्पर्शजं हीन्द्रियसुखं परं सुखं मन्वानःदुःखाग्निना दन्दह्यते। दन्दह्यमानस्यास्य जीवस्य ज्ञानमात्रमेवालम्बनमिति धिया ज्ञानयागमुपदिशति भगवद्गीता। तदुक्तं –

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥[16]

अस्यायमर्थः - सविज्ञानं नाम विज्ञानेन संयुक्तं ज्ञानं ज्ञानपदवाच्यम्। यदा ज्ञानम् आर्षाणाम् अनुभवपदवीमारोहति तदा एतद् विज्ञानसंज्ञां धत्ते। येन ज्ञानेन भगवत्तत्त्वनं सम्यगनुभवप्रकारमागच्छति। एतेन समुपलब्धेन ज्ञानेन पूर्वस्थितं मोहजनितानि अज्ञानानि समूलमुन्मूलितानि सन्ति ज्ञानान्तरस्य प्राप्स्यमानस्य अभावं समुद्घोषयन्ति, अर्थात् अन्यत् किमपि ज्ञातुं न समीहते ज्ञानी। अनुभवजन्येन ज्ञानेन ज्ञानयोगी सर्वाणि कर्माणि ज्ञाने पर्यवसाययति। ज्ञानानन्तरं कर्म न तिष्ठति इति तात्पर्यम्। तत्त्वदर्शिनः गुरोः सेवया तत्परिचर्यया परिप्रश्नेन च तदुपदिष्टेन ज्ञानेन एतत् सम्भवति। "तद्विज्ञानार्थ स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतेः। इदं तपोयोगादिषु मध्ये ज्ञानेन सदृशं पवित्रं किमपि नास्ति। अत एव प्रतिपादितम् –

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विदन्ति॥[17]

**अत्रेदं निष्कर्मयति यत्:** योगसंसिद्धः एवं ज्ञानं प्राप्नोति। तज्ज्ञानं न सर्वसुलभम्, किन्तु योगेन निष्कामकर्मयोगेन सम्यक् सिद्ध एव अर्थात् परिपक्वः सन् कालेन स्वयं प्राप्नोति। निष्कामकर्मणा एव अंतःकरणशुद्धता ज्ञानं स्यादिति फलितार्थः। एतेन परां शान्तिं समधिगच्छति इति ज्ञाने योगेन संसारनाशं व्यक्तिकरोति – "ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छतिह्ल इति। निष्कामकर्मानन्तरमेव कर्मसन्न्यास: ततश्च त्यक्तसमस्तकर्मा सन् ज्ञानाभ्यासानन्तरं कर्मबन्धं संशयशून्यं प्रजहाति। एवम्भूतमेव ज्ञानयोगिनं कर्माणि न निबध्नान्ति इति भगवता ज्ञानयोगस्य औत्कर्ष्यं प्रतिपादितम्।

योगसन्यास्तकर्माणं ज्ञानसंछिन्नसंशयम्।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जयः॥
तस्मादज्ञानसम्भूतं हृत्स्थ ज्ञानासिनात्मनः।
छित्त्वैनं संशयं योगमानिष्ठोत्तिष्ठ भारतं॥[18]

इदमेव ज्ञानं राजविद्या राजगुह्याख्येन योगेन प्रतिपादितम्। उपासनाः विविधाः परिकिर्त्तिताः, तास्वपि एषा राजायोगाख्या ज्ञानपरा या उपासना अनेकजन्मसञ्चितानां कर्मणां स्थूलसूक्ष्माणमपि तद्बीजानां नाशने पटुः इति सर्वोत्तमं पावनमिदमिति ब्रूते –

राजविद्या राजगुह्यं पवित्रमिदमुत्तमं।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुरव्ययम्॥

एवं प्रकारेण ज्ञानस्य तदनुष्ठानस्य वैशिष्ट्यं दर्शयता भगवता ज्ञानाग्निरेव सकलं कर्मजातं विनाशयति, यथा सूद्दीप्तो वह्निः काष्ठानि निमेषेण भस्मसातस करोति इति उपदिष्टम् –

"यथैधांसि समिद्धोग्निर्भस्मसात् कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भास्मसात् कुरुते यथा॥"[19]

**गीतायां भक्तियोग**

महत् वैशिष्ट्यमिदं लक्ष्यते यत् श्रीमद्भागवद्गीतायां विविधैः प्रकारैः सुबोधैः सरलैरूपायैः निखिलवेदार्थसारः आत्मसाक्षात्कारस्योपायः अखण्डानन्दप्राप्तिप्रकारश्च प्रतिबोधितः। तदर्थं तत्र ज्ञानयोग-कर्मयोग-राजयोगप्रभृतीनां सावलीलमुपस्थापनं सन्निवेशितम्। किन्तु सूक्ष्मेक्षिकया पर्यालोच्यमाने योगराजस्य भक्तियोगस्य महत्त्वं चतुरशिरोमणिना योगेश्वरेण श्रीकृष्णेन चतुर्येण प्रकाशितम्। भक्तियोगेन भगवत्तत्त्वविज्ञानं जायते, यथार्थदर्शनं च भवति। तथा चोक्तं –

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप॥

योगान्तरेभ्यः भक्तियोगस्य महदन्तरं लक्ष्यते। अन्ये योगाः कदाचिद् योगिनं भागवदितरेषु विषयेषु योजयन्ति, किन्तु भक्तियोगः यागिनं इतरेभ्यो विषयेभ्यो निवर्तय्य भगवदविषयेषु नियोजयति। एतदर्थ भक्तियोगः अव्यभिचारी। यनैव अव्यभिचारिणा भक्तियोगेन मायिकेभ्यः गुणेभ्यः पारं गत्वा विशुद्धं भावं समधिगच्छति। योगेश्वरेण एतदाज्ञप्तं –

मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥

समदर्शनः ब्रह्मभावापन्नः निराकाङ्क्षः आनन्दी स योगी परां भक्तिं लभते। एतेन भक्तियोस्य सर्वयोराजत्वं सुस्पष्टम्। तथा च –

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥

भक्तियोग एव भगवद्योगः। तेनैव योगेन अचिरात् इष्टप्राप्तिः सम्भवति। अत एव भक्तियोगं युञ्जानो योगिपदेन उच्यते। भगवता अर्जुनाय उपदिश्यते यत्-अभ्यासयोगे कर्मयोगे ध्यानयोगे च यदि त्वमसमर्थः तर्हि मद्योगमाश्रितः कर्मफलत्यागं कुरुष्वेति। तथा चोक्तं द्वादशाध्याये –

अभ्यासेऽप्यसमथोऽसि मत्कर्मो परमो भव।
मदर्थमपि कमार्णि कुर्वन् सिद्धिमवाप्स्यसि॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥[20]

पुनश्च भक्त एव यथार्थ योगीति प्रतिपादयति।

संतुष्टः सततं योगी यतात्माछदनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥[21]

भक्तियोगाधिकारी भगतत्प्रिय इति श्रीमुखेन भगवता प्रकाशितम्। एवमपि ज्ञानयोगिभ्यः, कर्मयोगिभ्यः सर्वेन्यो भक्तयोगी श्रेष्ठ इति प्रतिपिपादयिषता भगवता "तस्माद्योगी भवार्जुन" इति उपदिष्टम्। तथा चोक्तं –

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥

पूर्वमस्माभिः "योगी" इति पदेन भक्तस्य ग्रहणमिति द्वादशाध्यायस्य भगवद्वचनमुदाहृतम्। अत एव निःसंशयं वक्तुं शक्यते यत् भक्तियोगः एव सुलभः सुदुर्लभः पन्थाः, यमाश्रित्य सुखेन (क्लेशराहित्येन इत्यर्थः) अञ्जसा सुमञ्जुलं लक्ष्यं समुपलभ्येत। योगः क्लेशकराः, भक्तियोगः क्लेशहर इति प्रतिपादितम्। "क्लेशोऽधिकतरस्तेषाम्ह्ल इत्युक्त्वा अन्येषां साधनीभूतानां योगानां क्लेशप्रदत्वं विवेचितम्।" अनन्येनैवयोगेनह्ल इति भक्तियोगमनन्ययोगत्वेन प्रतिपाद्य, तस्य अनन्ययोगसाधने प्रवृत्तस्य उपासिनस्य "अहं समुद्धर्ताह्ल इति प्रतिपादितम्। एतेनैव ज्ञायते यत् अनन्यभक्तियोग एव योगान्तरेभ्यः चमत्कृतिं दधाति भगवत्प्राप्तिविषये। पुनश्च भक्तियोगं धर्म्यममृतञ्चेति निर्दिशति। यस्योपासनेन सुदुर्लभा भगवत्प्रियता अधिगम्यते। उक्तं च –

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥[22]

एवं रूपेण भक्तियोगस्य अनन्यत्वं, सर्वयोगराजत्वं, क्लेशहरत्वं च प्रतिपाद्य भक्तिमेव श्लाध्यतमामिति निष्कर्षयति। अतएव भक्तिमेव परमपुरुषार्थत्वेनाभिलषता भगवता श्रीकृष्णेन अर्जुनं प्रति उपसंहारवाक्यत्वेनोपदिष्टम्-

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥[23]

**सन्दर्भ ग्रन्थ**


1. गीता.२/४८
2. गीता.२/५०
3. गीता.६/२
4. गीता.६/२०
5. गीता८/२३
6. गीता.१४/२६
7. गीता.१०/१०
8. गीता.१२/६
9. गीता.१६/२४
10. छान्दयो.उप.५/१०/७
11. गीता.५/१२
12. गीता. ३/७
13. गीता. २/५०
14. गीता. ४/२४
15. गीता. ३/२०
16. गीता. ७/२
17. गीता. /३८
18. गीता. ४/४१,४२
19. गीता. ४/३७
20. गीता.१२/१०,११
21. गीता.१२/१४
22. गीता.१२/२०
23. गीता.१२/६६